## छन्दसि शायजपि। (८४/३४३२)

छन्दसि विषये श्नः शायच् आदेशो भवति, शानजपि[1]। 'गृभाय जिह्वया मधु' (ऋ. ८.१७.५)। शानचः खल्वपि – 'बधान [2]देव सवितः' (शु.य.१.२५)॥

## व्यत्ययो बहुलम्। (८५/३४३३)

यथायथं विकरणाः शबादयो विहिताः, तेषां छन्दसि विषये बहुलं व्यत्ययो भवति। व्यतिगमनं व्यत्ययः, [3]व्यतिहारः। विषयान्तरे विधानम्, क्वचिद् द्विविकरणता, क्वचित् त्रिविकरणता च। '[4]आण्डा शुष्णस्य भेदति' (ऋ. ८.४०.११)। भिनत्ति इति प्राप्ते। '[5]ताश्चिन्नु न मरन्ति' (ऋ. १.१९१.१२)। न म्रियन्ते इति प्राप्ते। द्विविकरणता – इन्द्रो [6]वस्तेन नेषतु। [7]नयतु इति प्राप्ते। त्रिविकरणता – '[8]इन्द्रेण युजा तरुषेम वृत्रम्' (ऋ. ७.४८.२)। [9]तीर्यास्म इति प्राप्ते। बहुलग्रहणं सर्वविधिव्यभिचारार्थम्।

सुप्तिङुपग्रहलिङ्गनराणां कालहलच्स्वरकर्तृयङां च।
व्यत्ययमिच्छति शास्त्रकृदेषां सोऽपि [10]च सिध्यति बाहुलकेन॥ (म. भा. २.६५)

## लिङ्याशिष्यङ्। (८६/३४३४)

आशिषि विषये यो लिङ् तस्मिन् परतः छन्दसि विषये [11]अङ् प्रत्ययो भवति। शपोऽपवादः। 'छन्दस्युभयथा' (३.४.११७/३४३५) इति [12]लिङः सार्वधातुकसञ्ज्ञाप्यस्ति। स्थागागमिवचिविदिशकिरुहयः प्रयोजनम् (म. भा. २.६५)। स्था – 'उपस्थेषं वृषभं तुग्रियाणाम्' (म. भा. २.६५)। गा – '(अञ्जसा) सत्यमुपगेषम्' (तै.सं.१.२.१०.२)। गमि – '[13]गृहं गमेम' (ऋ. १०.४०.११)। वचि – 'मन्त्रं वोचेमाग्नये' (ऋ. १.७४.१)। विदि – 'विदेयमेनां मनसि प्रविष्टाम्' (अ. १९.४.२)। शकि – 'व्रतं चरिष्यामि तच्छकेयम्' (आ.श्रौ. ८.१४.१)। रुहि – स्वर्गं लोकमारुहेयम्।

[२०९] दृशेरग् वक्तव्यः। (म. भा. २.६५)

'पितरं दृशेयं मातरं च' (ऋ. १.२४.१)॥

---

1. हौ परतः इत्यधिकम् अ. क. फ. 2. वत्सम् अ. ड. क, बधान त्वा फ, बधान पशुं मुद्रितः पाठः 3. व्यतिकरः न्या. अ. ह, व्यतिकरणम् फ. 4. आण्या ह. 5. स च न मरति न्या. प. मं 6. नस्तेन ग. 7. सिच्शपौ इत्यधिकम् फ. 8. इन्द्रेण नास्ति फ. 9. तरेम अ.फ.ह.प.मं. 10. हि मुद्रित पाठः 11. अञ् ह. 12. लिङः नास्ति ह. 13. गमेयमजानतो गृहान् क, गमेयमज्ञातो गृहान् ड.